वेव प्रायुक्तौ सामवेदिभिः प्रयुज्येते । तत्स्थाने तु तावेव प्रयोक्तव्यौ । काशीकाण्डे तु "इमं मन्त्रं ततश्चोक्त्वा कुर्य्यादाचमनं द्विजः । आचार्य्याः केचिदिच्छन्ति शाखाभेदेन चापरे । अन्तश्चरसि भूतेषु गुहायां विश्वतोमुख ! । त्वं यज्ञस्त्वं वषट्कार आपोज्योतीरसोऽमृतम्" । आचमने मन्त्रान्तरमुक्तम् । तदपि शाखिभेदाद्व्यवस्थाप्यम् । मधुपर्कानाङ्गाचमने वेदिभेदेन मन्त्रभेदा मत्कृत तुलादानादिपद्धतौ दृश्याः । विस्तरभयान्नेऽत्रनोक्ताः । तान्त्रिकाचमनन्तु शाक्तवैष्णवभेदात् द्विधा तत्र । शाक्ताचमनं यथा । "आत्मविद्याशिवैस्तत्त्वैराचामेत् साधकाग्रणीः । वह्निकान्तां परे दत्त्वा शुद्धेन पायसाचमेत्" स्वतन्त्रतन्त्रम् "आचामेदात्मतत्त्वाद्यैः प्रणवाद्यैर्द्विठान्तकैः" मालिनीत । तथा च ओँ आत्मतत्त्वाय स्वाहा ओँ विद्यातत्त्वाय स्वाहा ओँ शिवतत्त्वाय स्वाहेति मन्त्राः । काल्यादौ विशेषः तन्त्रसारे "कालिकाभिस्त्रिभिः पीत्वा काल्यादिभिरुपस्पृशेत् । द्वाभ्यामोष्ठौ द्विरुन्मृज्य चैकेन क्षालयेत् करम् । मुखघ्राणेक्षणश्रोत्रनाभ्युरस्कं भुजौ क्रमात् । आचम्यैवं भवेत् काली वत्सरान्तां प्रपश्यति" भैरवीत० । काल्यादयश्च "काली कपालिनी कुल्ला कुरुकुल्ला विरोधिनी । विप्रचित्ता तथोग्रोग्रप्रभा दीप्ता ततःपरम् । नीला घना बलाका च माता मुद्रा मिता च ताः" इत्युक्ताः प्रयोगस्तु क्रीमित्यादिमूलमन्त्रेण त्रिरपः पीत्वा ओँ काल्यै नमः कपालिन्यै नमः इति द्विरुन्मृजेत् । ओँ कुल्लायै नमः करं क्षालयेत् ओँ कुरुकुल्लायै नमः मुखस्य स्पर्शः । ओँ विरोधिन्यैनमः ओँ विप्रचित्तायै नमः दक्षवामनासिकयोः । ओँ उग्रायै नमः ओँ उग्रप्रभायै नमः नेत्रयोः । ओँ दीप्तायै नमः ओँ नीलायै नमः श्रोत्रयोः । ओँ घनायै नमः इति नाभेः । ओँ बलाकायै नमः वक्षसः, ओँ मातायै नमः शिरसः । ओँ मुद्रायै नमः ओँ मितायै नमः इत्यंसौ स्पृशेत् । ताराचमनं तु "ताराभेदैस्त्रिभिः पीत्वा मायया क्षालयेत् करम् । स्त्रीँ हूमोष्ठौ द्विरुन्मृज्य फट्कारैः क्षालयेत् करम् । आस्यं नासे दृशौ श्रोत्रे नाभिवक्षःशिरोभुजान् । वैरोचनादिभिः स्पृष्ट्वा सर्वपापैः प्रमुच्यते आचम्य भैरवो भूत्वा वत्सरान्तां प्रपश्यति" भैरवीत० । यथा ओँ उग्रतारायैनमः ओँ एकजटायै नमः ओँ नीलसरस्वत्यै नमः इति त्रिरपः पीत्वा ह्रीमिति वीजेन करं क्षालयेत् । स्त्रीँ हूँ नित्येताभ्यामोष्ठौ द्विरुन्मृज्य फडिति करं क्षालयेत् । ओँ वैरचनाय नमः इति मुखम् ओँ शङ्खपाण्डराय नमः ओँ पद्मनाभाय नमः दक्षवामनासिके । ओँ तावकाय नमः ओँ मामकाय नमः नेत्रे । ओँ पाण्डवाय नमः तारकाय नमः श्रोत्रे, ओँ असिताभाय नमः नाभिम् ओँ पद्मान्तकाय नमः वक्षः । ओँ यमान्तकाय नमः शिरः । ओँ विघ्नान्तकाय नमः ओँ नरान्तकाय नम इति अंसौ स्पृशेत् ।

वैष्णवाचमनं तु "केशवाद्यैस्त्रिभिः पीत्वा द्वाभ्यां प्रक्षालयेत् करौ । द्वाभ्यामोष्ठौ च संमृज्य द्वाभ्यां मृज्यात् मुखं ततः । एकेन हस्तं प्रक्षाल्य, पादावपि तथैकशः । संप्रोक्ष्यैकेन मूर्द्धानं ततः सङ्कर्षणादिभिः । आस्यनासाक्षिकर्णांश्च नाभ्युरस्कं भुजौ क्रमात् । स्पृशेदेवं भवेदाचमनञ्च वैष्णवान्वये" गौत० सचतुर्थीनमोऽन्तैश्च नामभिर्विन्यसेत् सुधीः" निबन्धे । ततश्च ओँ केशवाय नमः इत्यादि नामभिराचमनम् । केशवादयश्च "केशवनारायणमाधवगोविन्दविष्णुमधुसूदनत्रिविक्रमवामनश्रीधरहृषीकेशपद्मनाभदामोदरसङ्कर्षणवासुदेवप्रद्युम्नानिरुद्धपुरुषोत्तमाधोक्षजनृसिंहाच्युतजनार्द्दनोपेन्द्रहरिविष्णवः" तन्त्रसा० एताश्च चतुर्विंशतिविष्णुमूर्त्तयः । विष्णोर्द्विषोत्कीर्त्तनं मूर्त्तिभेदाभिप्रायेण चतुर्विंशतिमूर्त्तिशब्दे च तद्विवरणम् । अन्यदेवतानान्तु मूलमन्त्रेणाचमनमिति विवेकः । आचम्यते अनेन करणे ल्युट् । २आचमनसाधने देवतार्चनोपचारभेदे । "जातीफललवङ्गकक्कोलतोयञ्च षट्पलम् । प्रोक्तमाचमनमिति"तन्त्रसारोक्ते जातीफलादिचूर्णमिश्रिते षट्पलमिते जले तत्साधने ४जलमात्रे च भावे ल्युट् । पूजायां दत्ताचमनीयजलस्य ४पाने च । "सुवर्णकलसेनैवाचमनं कुरु केशव ! । पद्मचक्रधरो देव ! कृपालो ! परमेश्वर !" विष्णुपूजाचमनदानमन्त्रः ।

**आचमनक** न० आचमनस्य कं जलमत्र । १ पतद्ग्रहे (पिकदानि) (डावर) आचम्यतेऽनेन करणे ल्युट् । स्वार्थे कन् । २आचमनीयजलादौ ।

**आचमनीय** न०आचमनाय दीयते छ्वात् छ आ+चम–करणे बा० अनीयर् वा । आचमनीयार्थे द्रव्ये जातीफलादिचूर्णमिश्रिते षट्पलमिते १जले आचमनशब्दे प्रमाणमुक्तम् । "आचमनीयमाचनीयमाचमनीयं प्रतिगृह्यतामिति"भवदे० कर्मणि अनीयर् । पेयजले २स्वार्थे कन् तत्रैव । अर्घ्यमाचनीयकम्" षोड्शोपचारः "उच्छिष्टोऽप्यशुचिर्वापि यस्य स्मरणमात्रतः । शुद्धिमाप्नोति तस्मै ते पुनराचमनीयकम्" गौतमीयम् ।